**मुख्यवार्ता:**

- **वित्तमन्त्री निर्मला-सीतारमणः अद्य नवदिल्ल्यां आयोजितायां सभायां सार्वजनिक-क्षेत्रस्य वित्तकोषाणां कार्यप्रदर्शनस्य समीक्षां कृतवती ।**

- **विदेशमन्त्री डॉ. सुब्रह्मण्यम्-जयशंकरः अद्य नवदिल्ल्यां नेपालस्य विदेश-मन्त्रिणा डॉ. आरजू-राणा-देउबावर्यया सह परिचर्चां करिष्यति।**

- **राजधान्यां कोलकातायां एका प्रशिक्षु-चिकित्सकया सह कथित दुष्कर्म, हत्यायाः च विरुद्धं अद्य राजधान्यां नवदिल्ल्यां आवासीय चिकित्सकैः छात्रैश्च विरोध-प्रदर्शनानि विहितानि ।**

- **केन्द्रशासित प्रदेश जम्मू कश्मीरस्य विधानसभायाः मतदानस्य प्रथम चरणीया अधिसूचना श्वः प्रख्यापयिष्यते।**

- **अद्य रक्षाबन्धनस्य पावने अवसरे राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः जगदीप धनखडः, प्रधानमन्त्री श्री-नरेन्द्रमोदी च देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः ।**

**केन्द्रीयवित्तमन्त्री-निर्मला सीतारामन्**

केन्द्रीयवित्तमन्त्री निर्मला-सीतारमणः अद्य नवदिल्ल्यां आयोजितायां सभायां सार्वजनिक-क्षेत्रस्य वित्तकोषाणां कार्यप्रदर्शनस्य समीक्षां कृतवती । अस्यां सभायां वित्तीय-सेवा-विभागस्य सचिवः डॉ. विवेक-जोशी, सार्वजनिक-क्षेत्रस्य वित्तकोषाणां प्रबन्धन-निदेशकः एवं मुख्य कार्यकारी अधिकारी अथ च अन्ये वरिष्ठ-अधिकारिणः उपस्थिताः आसन् । सत्रे सीतारामन्-वर्या निक्षेपवृद्धेः, ऋण-निक्षेप-अनुपातस्य, सम्पत्ति-गुणवत्तायाः च समीक्षां कृतवती । अस्मिन् अवसरे वित्तमन्त्री, प्रधानमन्त्री-आवास-योजना, प्रधानमन्त्री-सूर्यगृह-योजना, प्रधानमन्त्री-विश्वकर्मा-योजना इत्यादीनां सर्वकारीय-उपक्रमानाम् अन्तर्गतं सार्वजनिक-क्षेत्रस्य वित्तकोषाणां कार्य-प्रदर्शनस्य मूल्याङ्कनं अपि कृतवती । अवधेयं यत् - मोदी-सर्वकारस्य तृतीय-कार्यकालस्य वित्तमन्त्रीपद-ग्रहणानन्तरं सीतारामन्-महोदयायाः, एषा प्रथमा वित्तकोष-समीक्षा वर्तते ।

**विदेश मंत्री डॉ. सुब्रह्मण्यम जयशंकरः**

विदेशमन्त्री डॉ. सुब्रह्मण्यम्-जयशंकरः अद्य नवदिल्ल्यां नेपालस्य विदेश-मन्त्रिणा डॉ. आरजू-राणा-देउबावर्यया सह परिचर्चां करिष्यति। डॉ. देउबा पंचदिवसीय-यात्रार्थं ह्यः नवदिल्लीं सम्प्राप्ता । विदेश-मंत्रालयेन एकस्मिन् वक्तव्ये प्रतिपादितम् यत् यात्रेयं भारत-नेपालयोः मध्ये उच्चस्तरीयायाः परिचर्चायाः परम्परानुकूला वर्तते। इयं यात्रा उभयोः पक्षयोः द्विपक्षीय-सहयोगस्य प्रगतये समीक्षायै च परिचर्चार्थं अवसरं प्रदास्यति । अनया यात्रया उभयोः पक्षयोः सम्बन्धाः सुदृढाः भविष्यन्ति।

-

**कोलकाता-हत्याकाण्ड**

राजधान्यां कोलकातायां एका प्रशिक्षु-चिकित्सकया सह कथित दुष्कर्म, हत्यायाः च विरुद्धं अद्य राजधान्यां नवदिल्ल्यां आवासीय चिकित्सकैः छात्रैश्च विरोध-प्रदर्शनानि विहितानि । अखिल भारतीय आयुर्विज्ञान संस्थानम् , सफदरजंग चिकित्सालयः, मौलाना आजाद चिकित्सीय महाविद्यालयः उत्तरीय रेल केन्द्रीय चिकित्सालयं समेत्य अन्य संस्थानानां चिकित्सकैः नव-दिल्लीस्थ निर्माण भवनस्य समीपे विरोध-प्रदर्शनानि विहितानि । अस्मिन् प्रकरणे एभिः

चिकित्सकैः न्यायस्य याचनापि विहिता। एते चिकित्सकानां , स्वास्थ्यकर्मिणां च सुरक्षायै सुरक्षा अधिनियमस्यापि याचनां कुर्वन्ति।

## प्रधानमन्त्री विश्व संस्कृत दिवस

प्रधानमन्त्री नरेन्द्रमोदी विश्व संस्कृत दिवसोपक्ष्ये जनेभ्य: शुभकामना: प्रदत्तवान्। असौ एकस्मिन् अन्तर्जालीय पटल सन्देशे संस्कृत भाषाया: प्रचारस्य प्रचाराय निरतेभ्य: जनेभ्य: अभिनन्दनानि शुभवचांसि च प्रदत्तवान्।

## रक्षाबन्धनम्

आभारते अद्य रक्षाबन्धनस्य पावन-पर्व हर्षोल्लासेन आमान्यते। अस्मिन्नवसरे भगिन्यः स्वभ्रातृणां मणिबन्धे विविधाः रङ्गयुक्ताः रक्षासूत्राणि बन्धन्ते। सममेव तेषां समृद्धयै, स्वास्थ्यलाभाय, कल्याणमय जीवनाय च प्रार्थनां कुर्वन्ति। भ्रातरः स्वभगिनीनां रक्षणार्थं सहाय्यतार्थं च वचनानि ददति। अस्मिन् पावने अवसरे राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः जगदीप धनखडः, प्रधानमन्त्री श्री-नरेन्द्रमोदी च देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः। राष्ट्रपरिः अवदत् यत् – अयम् उत्सवः भ्रातृ-भगिन्योः अमूल्य-बन्धनस्य उत्सवः वर्तते यः प्रीत्याः, परस्पर-विश्वासस्य च भावनां सुदृढयति। उपराष्ट्रपतिः उक्तवान् यत् अयम् उत्सवः भ्रातृ-भगिन्योः पवित्रबन्धनस्य उत्सवः अस्ति। अस्मिन् पावने अवसरे प्रधानमन्त्री श्रीमोदी सर्वेषां कृते सुख-समृद्धेः कामनां कृतवान्।

## प्रधानमन्त्री- बिक्रम-किशोर जन्मजयन्ती

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य महाराजा बीर-बिक्रम-किशोर-माणिक्य-बहादुर-वर्यस्य जन्म-जयन्त्युत्सवे श्रद्धाकुसुमान् समर्पितवान्। सामाजिक-सञ्जालीय-सन्देशे श्रीमोदी त्रिपुरस्य विकासे तस्य अविश्वसनीयं भूमिकां प्रकाशितवान्। श्रीमोदी निर्धनानाम्, दलितानां च सशक्तिकरणाय तस्य योगदानस्य प्रशंसाम् अपि अकरोत्। प्रधानमन्त्रिणा आश्वासनं दत्तं यत् त्रिपुरायाः प्रगतेः कृते महाराजाबीरविक्रमकिशोरस्य दृष्टिम्, पूर्णं कर्तुं सर्वकारः प्रतिबद्धः अस्ति।

## केन्द्र-प्रशासनम् मंकी पॉक्स

केन्द्र प्रशासनेन मंकी पॉक्स इत्यस्य रोगस्य विषये शीघ्रमेव प्रभावि-उपायान् कर्तुम् अपि च निरीक्षणं कर्तुं राज्येभ्यः निर्देशाः प्रदत्ताः। प्रधानमंत्रिणः प्रधान-सचिवः प्रमोद-कुमार-मिश्रा ह्यः देशे मंकी पॉक्स इत्यस्य निवारणाय स्वास्थ्योपायानां विषये समीक्षां विहितवान्। प्रधानमंत्री नरेन्द्र मोदी मंकीपॉक्स इत्यस्य स्थितिं ज्ञातुं निरीक्षणं करोति। श्री मिश्रा मन्त्रालय-पक्षतः अमुं रोगमालक्ष्य निरीक्षणं कर्तुं प्रयोगशालानां संवर्धनाय च निर्देशान् प्रदत्तवान्। सम्प्रति निरीक्षणाय द्वात्रिंशत् प्रयोगशालाः निर्मिताः सज्जिताः च सन्ति। अस्य रोगस्य उपचारात्मक उपायाः व्यापक स्तरे भवितव्याः। ध्यातव्यमस्ति यत् देशे मंकीपॉक्स इत्यनेन कोपि जनः रोगग्रस्तः नास्ति।

## मलेशिया: प्रधानमंत्री -भारत

मलेशियाया: प्रधानमंत्री अनवर बिन इब्राहिम अद्यारभ्य त्रिदिवसीया भारतयात्रायां अस्ति। प्रधानमंत्रित्वेन अनवर इब्राहिमस्य एषा प्रथमा यात्रा भविष्यति। विदेश मंत्रालयेन प्रोक्तं यत् श्री इब्राहिम महोदय: श्व: प्रधानमंत्रिणा नरेन्द्रमोदिना साकं द्विपक्षीया वार्तां करिष्यति। निज यात्रावधौ स: राष्ट्रपतिना द्रौपदीमुर्मूवर्यया, विदेशमंत्रिणा एस जयशंकरेण च साकं मेलनं करिष्यति।

**उपराष्ट्रपति-जिम्वाब्वे**

जिम्वाब्वे देशस्य उपराष्ट्रपति: कॉन्स्टें-टिनो गुवेया डोमिनिक न्याका-डजिनो चि -वेंगा अद्य नवदिल्ल्यां सम्प्राप्त:। असौ ऊनविंशतितमे सी आई आई इति भारत-अफ्रीकायो: व्यापार सम्मेलने श्व: भागग्रहणं करिष्यति। विदेश मंत्रालयस्य प्रवक्ता रणधीर जायसवाल: एकस्मिन् अन्तर्जालीय पटल सन्देशे प्रोक्तवान् यत् उभयो: देशयो: सहभागित्वं प्रगाढ़ सम्बन्धान् सबली करिष्यति।

**कोलकाता पद्म पुरस्कार– डॉक्टर**

सप्तत्यकिध पद्म पुरस्कार-विजेतार: चिकित्सका: प्रधानमत्रिणं श्री नरेन्द्रमोदिनं प्रति पत्रं विलिख्य आग्रहं कृतवान्त: यत् श्री मोदी, गतसप्ताहे कोलकाता आरजी कर वैद्यकीय विद्यालये घटिताया: चिकित्सिकाया: दुष्कर्म-हत्याया: विषये व्यक्तिगत-हस्तक्षेपं कुर्यात्। अस्मिन् पत्रे ते चिकित्सका: महिला-स्वास्थ्यकर्मिणां, महिलाचिकित्सकानां, सहकर्मिणां च रक्षणे सम्बलं दत्तवन्त:।

**कोलकाता-सीबीआई**

कोलकातायां सञ्जाते महिलाचिकित्सकया सह कथित दुष्कर्म हत्यायाः च प्रकरणे केन्द्रीय अन्वेषण विभागेन वैद्यकीय चिकित्सालयस्य पूर्व प्राचार्येण संदीप घोषेण सह परिपृच्छा करोति। परिपृच्छायाः अद्य चतुर्थः दिवसः वर्तते।

अस्मिन्नेव क्रमे विपक्षस्य नेता शुभेंदु अधिकारी प्रोक्तवान् यत् यैः जनैः अनया घटनयासम्बद्ध अन्तर्जालीय पटल सन्देशमालक्ष्य, अन्तर्जालीय अपराध विभागेन अपि च राज्य आरक्षिबलविभागेन सूचनाप्रपत्राणि प्राप्तानि सन्ति । तेभ्यः जनेभ्यः ते विधेः साहाय्यं प्रदास्यन्ते।

**॥ इति वार्ता:॥**